# Shri Ramachandra Artikyam

# શ્રીરામચન્દ્રાર્તિક્યમ્

## Document Information

Text title : Shri Ramachandra Artikyam

File name : rAmachandrArtikyam.itx

Category : raama, moropanta, AratI

Location : doc_raama

Author : Mayurakavi or Moropanta

Proofread by : Rajesh Thyagarajan

Description/comments : Stotras composed by Moropanta mayUrakavi

Latest update : December 23, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 23, 2023

*sanskritdocuments.org*

# શ્રીરામચન્દ્રાર્તિક્યમ્

જય જય સીતાવલ્લભ! । દશવદનાદ્રિપવે !
(૧)ભવતા પદમુરુ દત્તં નિજસદનાદ્રિપવે । ધ્રુવ૦॥

(૨)જનુષાલઙ્કૃતમિનકુલમથ મુનિમખરક્ષા
દૃષદપિ વિહિતા કર્મસુ પદરજસા દક્ષા
ત્ર્યમ્બકધનુરપિ ભગ્નં, તદનુ વૃતા સ્વક્ષા(૩)
વિજિતઃ પથિ પાટિતપરપૃથ્વીપતિવક્ષાઃ(૪) ॥ ૧॥

રાજ્યં તૃણવત્ત્યક્તં ગુર્વર્થં સહસા
યો શૂર્પણખા વિકૃતાઽકાર્યરિદુઃસહ સા
સુગ્રીવમતિર્મુદિતા વ્યરચિ ધનુર્મહસા(૬)
લઙ્કાદાહાત્પ્રભૃતિ ત્રિદશસભા સહસા ॥ ૨॥

બન્ધનમબ્ધેઃ કપિભી રાક્ષસબલદલનં
ભક્તબિભીષણરાજ્યં યસ્યાસ્તિ ન ચલનં(૭)
ભરતમયૂરં પ્રતિ યત્કરુણાઘનવલનં
વાલ્મીકેરપિ યશસોઽશક્યં પરિકલનમ્ ॥ ૩॥

ઇતિ શ્રીરામનન્દનમયૂરેશ્વરકૃતં શ્રીરામચન્દ્રાર્તિક્યં સમ્પૂર્ણમ્ ।
૧। ભવતા નિજમદનાદ્ ઉરુ શ્રેષ્ઠં પદં રિપવે દત્તમિત્યન્વયઃ ।
૨। ઇનઃ સૂર્યસ્તસ્ય કુલમ્ ।
૩। શોભને અક્ષિણી યસ્યાસ્તાદૃશી સીતા ।
૪। પાટિતાનિ પરપૃથ્વીપતીનાં વક્ષાંસિ યેન તાદૃશો ભાર્ગવઃ ।
૫। યા શૂર્પણખા, સા, હે અરિદુઃસહ, ત્વયા વિકૃતા અકારીતિ યોજ્યમ્ ।
૬। ચાપસ્ય તેજસા વાલિહનનેનેતિ યાવત્ ।
૭। ધ્રુવમિત્યર્થઃ ।

Proofread by Rajesh Thyagarajan

*Shri Ramachandra Artikyam*

pdf was typeset on December 23, 2023

Please send corrections to *sanskrit@cheerful.com*